पुणें) महाराष्ट्रराज्यशासन-भारतकेन्द्रशासन-पुरस्कृता विश्वप्रिया (मुम्बई
शृङगेरी-शारदापीठ-श्रीशंकराचार्यैः संस्कृत-'शंकरकृपा'-त्वेन स्वीकृता

सौर भाद्रपद १८९२ सप्टेंबर १९७०

शारदा

संपादकः वसन्त अ. गाडगीळ.

वर्षम् ११ अङ्कौ २१-२२

वार्षिकमूल्यम् रू. ८ * अस्य अङ्कस्य रू. १-००

स्तोत्रपञ्चदशी

श्री. म. स. आपटीकर

* *

शारदा - गौरव - ग्रन्थमाला - पुण्यपत्तनम् ३०

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

स्मर्यताम् ।　　　　त्वर्यताम् ।　　　　स्मर्यताम् ।

शारदा-द्वादश-वर्षारम्भोत्सवे

राष्ट्रगुरु-विवेकानन्द-विषये

डॉ. ग. बा. पळसुले – विरचित-विवेकानन्द-जीवन-चरित-भूषितम्

शारदा–विशेषाङ्क–प्रकाशनम्

प्रकाशनम् – दीपावली-मङ्गलोत्सवे १ नोव्हेम्बर १९७०
पृष्ठसंख्या – शतत्रयाधिका (३००)
विशेषाङ्कमूल्यम् – रूप्यकाष्टकम्

सत्वरं प्रेष्यतां शारदा-वार्षिक-मूल्यं रू. ८=०

– संपादकः ।

ग्रामस्थाः सन्तु नगरस्थाः वा भवन्तु ये दुर्बलाः असमर्थाश्च तेषां दारिद्र्य-निर्मूलनार्थं सहकारिक्षेत्रद्वारा वयं सातत्येन प्रयतनशीलाः।

महाराष्ट्र-राज्य-सहकारी-अधिकोषः मर्यादितः

(दि महाराष्ट्र स्टेट को-ऑपरेटिव्ह बॅङ्क लिमिटेड)

केन्द्रकार्यालयः
९ बॅंक हाऊस लेन
फोर्ट, मुंबई १

प्रादेशिक-कार्यालयः
महाल, नागपुरम्

भाग-धनं निधिश्च – रु. १५ कोटचधिकम्
सर्वं न्यासधनम् – रु. ७५ कोटचधिकम्
सर्वम् ऋणधनम् – रु. १०६ कोटचधिकम्
सर्वः संचारी निधिः – रु. १४२ कोटचधिकम्

सामान्यातिसामान्यजनस्य सदैव हितचिन्तनपरः
सर्वश्रेष्ठः सहकारी अधिकोषः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

शारदा-गौरव-ग्रन्थमाला ... २३

स्तोत्र-पञ्चदशी

★

रचयिता

पं. म. स. आपटीकर

★

मूल्यम् : एक-रूप्यकः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

प्रकाशकः
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थमाला
४२५ सदाशिवपेठ, पुण्यपत्तनम् ३०

मुद्रकः
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५, सदाशिवपेठ, पुण्यपत्तनम् ३०
यशवन्त मुद्रणालयः
१८३५, सदाशिवपेठ, पुण्यपत्तनम् ३०

सर्वाधिकाराः प्रकाशकायत्ताः

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

प्रकाशकीयम्–

‘शारदा’-भूषणं स्तोत्रमौक्तिकमाला

स्तोत्रवाङ्मयम् । संस्कृत-साहित्यस्य भूषणम् । मङ्गलम् । पवित्रम् । भक्ति-रसायनम् । आद्यश्रीशंकराचार्यैः भगवत्पूज्यपादैः प्रापिता इयं स्तोत्रसाहिती अमृतमाधुरीम् । पाठं पाठं, स्मारं स्मारं विस्मरति स्वात्मानं पाठकः । स्वात्मानं विस्मृत्यैव प्राप्नोति परमात्मानं परमेशम् । इयं भक्तिगङ्गा भारतवर्षे अखण्डं प्रवाहशीला विराजते । समये समये भक्तोत्तमाः भक्तिमन्दाकिनीम् आश्रित्य पावयन्ति स्वात्मानम् । संस्कृताम् अमरवाणीं शरणीकृत्य भक्तिभाव-भरितं स्वीयं हार्दम् अक्षरीकुर्वन्ति । तेषु अन्यतमाः शारदा-‘-मित्रोत्तमाः पं. म. स. आपटीकरमहोदयाः सातारा-नगर-भूषणम् । चिराय समर्पिता तैः शारदा-कण्ठभूषणत्वेन तेषां स्तोत्रमौक्तिकमाला । परं ताम् अक्षरीकर्तुं न लब्धा-वसराः वयम् एतावत् कालपर्यन्तम् । पारितं संप्रति तद्-मुद्रणम् । शारदोपासकाः तेषाम् आह्निके ईशोपासनार्थम् एतेषां स्तोत्राणां नित्यपाठं कुर्वन्तु । ‘भक्तिः एव गरीयसी’ इति भगवद्भक्तश्रेष्ठस्य महर्षिनारदस्य सूक्तिं स्वयम् अनु-भवन्तु । तन्माधुर्यं स्वयम् आस्वाद्य ख्यापयन्तु सर्वेभ्यः । इयमेव प्रार्थना । धन्यवादार्हाः भक्तिविह्वलाः भक्तादर्शाः मित्रवर्याः पं. म. स. आपटीकरमहोदयाः । नमो नमः ।

* * *

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

अनुक्रमणिका

१ श्रीगणेशाष्टकम्
२ श्रीशारदास्तवः
३ श्रीशिवनामावली
४ श्रीशिवविभक्तिस्तोत्रम्
५ श्रीकैलासशैलशिखराधिपतिस्तवः
६ श्रीविचित्रचरितस्तोत्रम्
७ श्रीशिवभवानीस्तवः
८ श्रीरामचन्द्रस्तवः
९ श्रीदत्तगुरुस्तवः
१० श्रीलक्ष्मीस्तुतिः
११ श्रीहनूमत्संस्तवः
१२ श्रीसप्तसप्तिसप्तकम्
१३ श्रीकृष्णचरितम्
१४ श्रीमन्दाकिनीस्तोत्रम्
१५ श्रीशारदा-स्तवनम्

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

१. ॥ श्रीगणेशाष्टकम् ॥

(भुजङ्गप्रयातम्)

अविद्यानिहन्त्रे सुविद्याप्रदात्रे
नमो विघ्नहन्त्रे सदानन्ददात्रे ।
उमाकान्तपुत्राय विघ्नान्तकाय
नमस्ते नमस्तेऽन्तरायान्तकाय ॥ १

नमो भालचन्द्राय सिद्धिप्रदाय
चिदानन्दरूपाय दुःखान्तकाय ।
अनन्ताय शान्ताय नागान्तकाय
नमस्ते नमस्तेऽन्तरायान्तकाय ॥ २

नमस्ते भवानीसुपुत्राय नित्यं
नमस्ते सदा भक्तचित्तार्तिनाशिन् ।
नमस्ते प्रभो ज्ञानदात्रे नमस्ते
नमस्ते मनोवाञ्छितानन्ददाय ॥ ३

सुदूर्वाङ्कुरै रक्तपुष्पैर्लसन्तं
सदा मोदकैर्मोदमानं गजास्यम् ।
शमीपत्रतुष्टं सुगन्धप्रियं त्वां
भवाम्भोधिमग्नो भवन्तं भजेऽहम् ॥ ४

अनाथार्तिनाशिन् पुरारातिपुत्र
मयूरेश हेरम्ब हे ढुण्ढिराज ।
विनाशाय विघ्नस्य बद्धाञ्जलिस्त्वाम्
अहं प्रार्थये भक्तियुक्तो गणेश ॥ ५

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

त्वदीयाय भक्ताय दत्त्वा वरांस्त्वं
शुभैराशिभी रक्ष संसारसिन्धौ ।
अरे सिन्धुरारे दयाब्धे भवाब्धौ
निमग्नं विपन्नं जनं पाहि नित्यम् ॥ ६

गणेश त्वदीयं पदाब्जं शरण्यं
प्रसीद प्रसीद प्रभो पाशपाणे ।
वरेण्य प्रभो क्षेमदातर्नमस्ते
सदा प्रार्थये त्वामहं भक्तियुक्तः ॥ ७

प्रसीद प्रसीद प्रतापार्क देव
प्रसीद प्रसीदैकदन्त प्रभो त्वम् ।
प्रसीद प्रसीद प्रभो विघ्नहर्तः
प्रसीद प्रसीद प्रभो वक्रतुण्ड ॥ ८

भुजङ्गप्रयाते निबद्धं मया यो
गणेशाष्टकं भक्तियुक्तश्च चित्ते ।
सदा ध्यायति स्तोत्रमेतत्स धन्यः
सुखं शान्तिमाप्त्वाधिगच्छेत् स पुण्यम् ॥ ९

सखारामसूनुर्महादेवशर्मा
लिखित्वा गणेशाष्टकं भक्तियुक्तः ।
परां शान्तिमाप्नोद् विनाशं विपत्तेर्
मनोवाञ्छितं श्रीगणेशकृपातः ॥ १०

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

२. ॥ श्रीशारदास्तवः ॥

(पृथ्वी)

नमामि धवलांशुकां सरसिजासनां शारदां
नमामि तिमिरापहां सकलबुद्धिदां देवताम् ।
नमाम्यमरपूजितां विविध-गीत-सन्तोषितां
नमामि शरणार्थिनां व्यसननाशिनीं सिद्धिदाम् ॥ १

नमामि सरसीरुहासन-विभूषितां सुन्दरीं
करे स्फटिकमालिकां विदधतीं प्रसन्नाननाम् ।
सदाऽध्ययनतत्परान् सततभक्तिसेवारतान्
जनानवसि शारदे सकलसौख्यदे देवते ॥ २

न राज्यमपि कामये न च सुखेऽपि मे कामना
न कीर्तिमपि काङ्क्षते मम मनो यशोदायिनि ।
मदीयहृदये दयामयि सदा निवासं कुरु
त्वदीयगुणकीर्तने मम रतिः सदा वर्धताम् ॥ ३

त्वमेव वरदायिनी सकलवाङ्मयाधीश्वरी
सुकीर्तिधनदायिनी त्वमसि देवि वीणाधरे ।
नमन्ति विबुधाः सदा तव पदारविन्दद्वयं
त्वमेव भव शारदे भवनिधौ ममोद्धारिणी ॥ ४

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

तवैव कृपया विधिः सृजति देवि विश्वावलीं
सरस्वति मुरारिणा जगदिदं सुसंरक्षितम् ।
तवैव कृपया हरो हरति विश्वपापावलीं
कृपा न तव चेत्कथं हरिहरादयः पान्तु नः ॥ ५

त्रिलोकभयनाशिनी त्रिविधतापसंहारिणी
सुधामधुरभाषिणी सुमनसां यशोदायिनी ।
सुवर्णपदधारिणी नवरसैश्च संतोषिणी
ममागुणविनाशिनी भवतु साऽथ तेजस्विनी ॥ ६

सदैव कविमानसे विजयसे जगन्मोहिनी
मरालनृपवाहिनी मधुरमालपन्ती सदा ।
नितान्तरमणीयतां विदधती सुवर्णायुता
मदीयमनसि स्थिता भवतु दिव्यवागीश्वरी ॥ ७

अनल्पसुखदायिनी दुरितदुःखविध्वंसिनी
सुभाषितसुभाषिणी नवरसाम्बुसंतोषिणी ।
मनोमलविनाशिनी सकलसौख्यनिष्यन्दिनी
मदन्तरनिवासिनी भव सदैव मेधाविनी ॥ ८

इमं संस्तवं शारदायाः सुरम्यम्
पठेत् प्रत्यहं सादरं मानवो यः ।
जडत्वं मतेस्तस्य नीत्वा विनाशम्
प्रसन्ना भवेत् शारदा ज्ञानदात्री ॥ ९

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

३. ॥ श्रीशिवनामावली ॥

(पञ्चचामरम्)

अनादिमादिनायकं इभेन्द्रचर्मवाससम् ।
तमीश्वरं सदाशिवं नमाम्यहं महेश्वरम् ॥ १

उमेशमूर्ध्वरेतसं ऋषीश्वरादिवन्दितम् ।
तमेकदन्तवत्सलं नमाम्यहं महेश्वरम् ॥ २

तमैहिकप्रदं शिवं तमौषधीशभूषणम् ।
तमन्तकच्छिदं हरं नमाम्यहं महेश्वरम् ॥ ३

कपर्दिनं च कामदं किरातरूपधारिणम् ।
तथैव कीर्तिदं शिवं नमाम्यहं महेश्वरम् ॥ ४

कुमारतातमीश्वरं हिमाद्रिकूटवासिनम् ।
सदैव कृत्तिवाससं नमाम्यहं महेश्वरम् ॥ ५

खरत्नलोचनं शिवं खकुन्तलं च शङ्करम् ।
तथा च खेचरीपतिं नमाम्यहं महेश्वरम् ॥ ६

गजेन्द्रचर्मवाससं च गाङ्गवारिभूषणम् ।
गिरामधीश्वरं शिवं नमाम्यहं महेश्वरम् ॥ ७

नमामि घस्रलोचनं तथैव घर्घरीप्रियम् ।
तथा च घोररूपिणं नमाम्यहं महेश्वरम् ॥ ८

नमाम्यनङ्गनाशकं विहङ्गभक्ष्यभूषणम् ।
सदैव सङ्कटान्तकं नमाम्यहं महेश्वरम् ॥ ९

चकोरबन्धुशेखरं सुचारुचन्द्रभूषणम् ।
चिताविभूतिभूषितं नमाम्यहं महेश्वरम् ॥ १०

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

नमामि छत्रकप्रियं च छागवाहनस्तुतम् ।
त्रिमूर्तिमीश्वरं शिवं नमाम्यहं महेश्वरम् ।। ११

जटाधरं च जाह्नवीशमीश्वरं जितेन्द्रियम् ।
तथैव जीवरक्षकं नमाम्यहं महेश्वरम् ।। १२

झषध्वजान्तकं शिवं तथा च झर्झरप्रियम् ।
त्रियम्बकं त्रिलोचनं नमाम्यहं महेश्वरम् ।। १३

अनेकपापसञ्चयान्तकं सदाशिवं हरम् ।
धनञ्जयास्त्रदायकं नमाम्यहं महेश्वरम् ।। १४

नटं च नाटचदैवतं जटाधरं नटेश्वरम् ।
जटाटवीगलज्जलं नमाम्यहं महेश्वरम् ।। १५

शठान्तकं च नीलकण्ठमीश्वरं स्मरान्तकम् ।
गजाजिनावगुण्ठितं नमाम्यहं महेश्वरम् ।। १६

प्रचण्डताण्डवप्रियं मृडं मृकण्डुसंस्तुतम् ।
षडास्यतातमीश्वरं नमाम्यहं महेश्वरम् ।। १७

नमामि ढुण्ढिराजतातमीश्वरं सदाशिवम् ।
भवान्तकं च भैरवं नमाम्यहं महेश्वरम् ।। १८

नमामि रावणस्तुतं फणाधरेन्द्रभूषणम् ।
तथैव जिष्णुपूजितं नमाम्यहं महेश्वरम् ।। १९

तपस्विगम्यमीश्वरं च ताण्डवप्रियं शिवम् ।
तुरीयधामदायकं नमाम्यहं महेश्वरम् ।। २०

सदैव सत्पथप्रियं व्यथाहरं कथाप्रियम् ।
कृशानुरेतसं शिवं नमाम्यहं महेश्वरम् ।। २१

दयार्णवं च दानवेन्द्रपूजितं दिगम्बरम् ।
सदैव दीनबान्धवं नमाम्यहं महेश्वरम् ।। २२

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

धराधरेन्द्रनन्दिनीपतिं च धूर्जटिं तथा ।
भवान्तकं मखान्तकं नमाम्यहं महेश्वरम् ।। २३

नगेशनन्दिनीपतिं च नागराजभूषणम् ।
सुनीलकण्ठमीश्वरं नमाम्यहं महेश्वरम् ।। २४

परेशमीश्वरं शिवं च पार्वतीपतिं तथा ।
पिनाकपाणिमीश्वरं नमाम्यहं महेश्वरम् ।। २५

सुपीतसर्पभूषितं पुरत्रयादिनाशकम् ।
सुरेन्द्रपूजितं शिवं नमाम्यहं महेश्वरम् ।। २३

फणीन्द्रभूषणं हरं नटेश्वरं च शङ्करम् ।
सदाशिवं त्रिलोचनं नमाम्यहं महेश्वरम् ।। २७

सदैव बिल्वपूजितं बुधार्चितं पुरच्छिदम् ।
तथैव बन्धमोचकं नमाम्यहं महेश्वरम् ।। २८

भवं च भासुरं तथा सदैव भीमशङ्करम् ।
भुजङ्गभूषणं शिवं नमाम्यहं महेश्वरम् ।। २९

महेश्वरं च मानदं च मित्रचन्द्रलोचनम् ।
तथैव मुक्तिदं मृडं नमाम्यहं महेश्वरम् ।। ३०

नमामि यज्ञनाशकं च यामिनीशभूषणम् ।
युगान्तवह्निलोचनं नमाम्यहं महेश्वरम् ।। ३१

रतिप्रियान्तकं शिवं च रामशत्रुपूजितम् ।
सदैव रुद्रमीश्वरं नमाम्यहं महेश्वरम् ।। ३२

ललाटपट्टपावकं तथैव लासकं शिवम् ।
सदैव शम्भुमीश्वरं नमाम्यहं महेश्वरम् ।। ३३

वसन्तमित्रदाहकं विभूतिदेहभूषणम् ।
वृषध्वजं च शङ्करं नमाम्यहं महेश्वरम् ।। ३४

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

शशाङ्कमौलिमीश्वरं च शाम्भवीप्रियं शिवम् ।
तथैव शूलधारिणं नमाम्यहं महेश्वरम् ॥ ३५

षडास्यतातमीश्वरं च षाडवप्रियं हरम् ।
कपालिनं स्मरान्तकं नमाम्यहं महेश्वरम् ॥ ३६

सदाशिवं च सिद्धिदं सुरासुरेन्द्रपूजितम् ।
सदैव सोमनायकं नमाम्यहं महेश्वरम् ॥ ३७

हरं हिमाद्रिजापतिं तथा च हीरकप्रभुम् ।
हुताशनेक्षणं हरं नमाम्यहं महेश्वरम् ॥ ३८

शताधिकां शिवाभिधानमालिकां पठेन्नरः ।
सुखं लभेत जीविते स शङ्करप्रसादतः ॥ ३९

अकारादि-हकारान्तं मातृकावर्णसंयुतम् ।
शिवस्तोत्रमिदं पुण्यं यः पठेत् स भवेत् सुखी ॥ ४०

शिवनामावलीं दिव्यां महादेवेन गुम्फिताम् ।
यः कण्ठे धारयेद् रम्यां शिवस्तस्य प्रसीदतु ॥ ४१

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

४. ।। श्रीशिवविभक्तिस्तोत्रम् ।।

(स्रग्विणी)

अव्ययः स्वस्तिदः शङ्करः पातु माम् ईश्वरस्त्र्यम्बकः सिद्धिदः पातु माम् ।
ऊर्ध्वरेताः शिवो धूर्जटिः पातु मां भास्वरो भैरवो मुक्तिदः पातु माम् ।।

अष्टमूर्ति शिवं विश्वनाथं हरम् भूतनाथं भवं वैद्यनाथं मृडम् ।
दक्ष-जामातरं यज्ञविध्वंसकम् भालनेत्रं सदा सादरं नौम्यहम् ।। २

योगिना निर्मितं विश्वमेतत् पुरा शम्भुना रक्षितं विश्वमेतत् सदा ।
शूलिना नाशिता आपदः प्राणिनां सौख्यदं तं शिवं प्राञ्जलिः स्तौम्यहम् ।।

शम्भवे स्थाणवे भिक्षवे योगिने शूलिने धन्विने दैत्यहन्त्रे नमः ।
विश्वकर्त्रे नमो विश्वधर्त्रे नमो विश्वसंहारिणे भक्तपात्रे नमः ।। ४

वह्निनेत्रात्तथा सर्वभूतात्मनो नीलकण्ठात्तथा शैलजावल्लभात् ।
वामदेवात्तथा दक्षयज्ञान्तकाद् व्योमकेशात्परं दैवतं नापरम् ।। ५

यज्ञसंहारिणः शूलिनः शृङ्गिणो जाह्नवीधारिणो धन्विनो धूर्जटेः ।
अष्टमूर्तेस्तथा भानुकोटिद्युतेः पादपद्मं सदा ध्यायते योगिभिः ।। ६

ईश्वरे शङ्करे पार्वतीवल्लभे त्र्यम्बके धूर्जटौ सर्वभूताधिपे ।
चन्द्रचूडे तथा व्याघ्रचर्मावृते विश्वनाथे मनः सर्वदा लीयताम् ।। ७

शूलपाणे विभो विश्वनाथ प्रभो भस्ममन्दाकिनीभूषिताङ्ग प्रभो ।
अष्टमूर्ते विभो मुण्डमाल प्रभो चन्द्रमौले विभो धूर्जटे पाहि माम् ।। ८

विभक्तिरूपस्य सदाशिवस्य स्तोत्रं सुरम्यं मनुजः पठित्वा ।
अनन्यचित्तेन प्रतिप्रभातं कल्याणमाप्नोतु शिवप्रसादात् ।। ९

।। ॐ ।।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

५. ॥ कैलासशैलशिखराधिपतिस्तवः ॥

(वसन्ततिलका)

हे नीललोहित सदाशिव विश्वनाथ मन्दाकिनी-सलिल-भूषण चन्द्रचूड ।
मृत्युञ्जय प्रणतभक्तजनार्तिनाशिन् कैलास-शैल-शिखराधिपते नमस्ते ॥ १

कन्दर्प-दर्प-हर सर्प-विभूषिताङ्ग भस्माङ्गराग नरमुण्ड-कपाल-माल ।
खट्वाङ्ग-शूल-डमरू-धर काशिनाथ कैलास-शैल-शिखराधिपते नमस्ते ॥ २

शम्भो स्मरान्तक विभो वृषभाधिरूढ कारुण्य-वारि-जलधे प्रणमाम्यहं त्वाम्
संसार-सागर-जलादव मां महेश कैलास-शैल-शिखराधिपते नमस्ते ॥ ३

त्रैलोक्यनाथ गिरिनाथ-सुताधिनाथ भूताधिनाथ गणनाथ मखाधिनाथ ।
श्रीसोमनाथ जगतामधिनाथ नाथ कैलास-शैल-शिखराधिपते नमस्ते ॥ ४

कर्पूरगौर हर शङ्कर घोररूप हे नीलकण्ठ भुजगेश-विभूषिताङ्ग ।
विद्युत्प्रभारुणजटाधर वामदेव कैलास-शैल-शिखराधिपते नमस्ते ॥ ५

विश्वावलीं सृजसि शैलसुतान्वितस्त्वं विश्वम्भरोऽसि शिव-शक्तियुतो सुरेश
विश्वं विनाशयसि ताण्डव-नृत्य-काले कैलास-शैल-शिखराधिपते नमस्ते ॥

अज्ञान-कज्जल-विनाशकराय तुभ्यं सूर्येन्दु-वह्नि-नयनाय सदा नमस्ते ।
दक्षात्मजा-प्रिय महेश्वर पार्वतीश कैलास-शैल-शिखराधिपते नमस्ते ॥ ७

ॐकाररूप शशिखण्ड-शिखण्ड-मौले विश्वेश शर्व मदनान्तक शूलपाणे ।
रुद्राक्ष-हार विषमाक्ष पिनाकपाणे कैलास-शैल-शिखराधिपते नमस्ते ॥ ८

कैलास-शैल-शिखराधिपतेः स्तवं यः श्रद्धायुतो पठति नित्यमनन्यचित्तः ।
नश्यन्ति तस्य बहुजन्मकृतान्यघानि शान्ति च सोऽत्र लभते मनसः सुखं च ॥

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

६. ॥ विचित्र-चरित-स्तोत्रम् ॥

(वसन्ततिलका)

भिक्षाचरोऽपि जगतामधिपोऽसि भिक्षो
कण्ठे विषं तव तथाप्यमृतप्रदस्त्वम् ।
स्थाणुस्तथापि भजतां फलदोऽसि नित्यं
तुभ्यं विचित्रचरिताय नमो नमस्ते ॥ १

शम्भो भवोऽसि हि तथापि भवान्तकस्त्वं
कामान्तकोऽपि शरणागत-कामदस्त्वम् ।
योगीन्द्र-पूजित विभोऽसि नटेश्वरस्त्वं
तुभ्यं विचित्रचरिताय नमो नमस्ते ॥ २

त्वं निर्मलोऽसि हि तथापि दधासि भाले
कालाङ्कितां शशिकलां रमणीयमूर्तिम् ।
तत्रैव चापि नयने वहसि त्वमग्निं
तुभ्यं विचित्रचरिताय नमो नमस्ते ॥ ३

हस्ते तवास्ति हर भीतिकरस्त्रिशूल-
स्तापत्रयं हरसि तेन विभो नराणाम् ।
पापं च नाशयसि मस्तकगाङ्गवारा
तुभ्यं विचित्रचरिताय नमो नमस्ते ॥ ४

देहे तवास्ति शवदेहविभूतिलेपः
शम्भोस्तथापि जनभूतिकरः प्रभो त्वम् ।
भोगीन्द्र-भूषण सदाऽभयदोऽसि देव
तुभ्यं विचित्रचरिताय नमो नमस्ते ॥ ५

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

कण्ठे धृतास्ति नरमुण्डकपालमाला
पावित्र्यमूर्तिरसि रुद्र तथापि भोस्त्वम् ।
दृष्टिः समाऽस्ति विषमेक्षण लोकनाथ
तुभ्यं विचित्रचरिताय नमो नमस्ते ।। ६

यज्ञप्रियोऽपि भगवन्नसि यज्ञनाशी
वैराग्यमूर्तिरपि शङ्कर सानुरागः ।
यक्षाधिपस्तव सखास्ति तथापि भिक्षु-
स्तुभ्यं विचित्रचरिताय नमो नमस्ते ।। ७

वृद्धो वृषो वहनमस्ति तवाष्टमूर्ते
पादारविन्दनमनाय तथापि शक्रः ।
ऐरावतादवनिमेत्य विनम्र आस्ते
तुभ्यं विचित्रचरिताय नमो नमस्ते ।। ८

स्तोत्रं विचित्रचरितस्य शिवस्य प्रात-
र्भक्त्या स्मरेदहरहः शुचिमानसो यः ।
तापत्रयं जगति तस्य विनाश्य शम्भुः
कीर्ति धनं च विपुलं प्रददाति तस्मै ।। ९

।। ॐ ।।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

७. ॥ श्रीभवानीस्तवः ॥

(पञ्चचामरम्)

मदान्ध-दैत्य-मर्दिनीं सुतीक्ष्ण-शस्त्र-धारिणीं
नमज्जनानुकम्पिनीं समस्त-दुःख-हारिणीम् ।
सुभक्त-सौख्य-कारिणीं भवाधिताप-नाशिनीं
कृपा-कटाक्ष-वर्षिणीं नमामि तां सुहासिनीम् ॥ १

सदाशिव-प्रियां शिवां सदाऽशिवाशुनाशिनीं
तपोबलेन तापसाधिराज-चित्त-हारिणीम् ।
कृतान्त-कान्तकप्रियां सतामनन्तशान्तिदां
निरन्तरं हृदन्तरे विचिन्तयामि तामुमाम् ॥ २

त्वदीयसेवको भवानि याचनां करोम्यहं
मदीय-दुःख-नाशने त्वरस्व देवि सत्वरम् ।
अनाथतां त्वया विना विनाशयेत् परः कथं
नमस्करोमि पार्वति त्वदीयपादपङ्कजम् ॥ ३

प्रसीद हे शुभङ्करि प्रसीद हे दयाकरि
प्रसीद हे सुरेश्वरि त्रिलोकशङ्करीश्वरि ।
प्रसीद हे नटेश्वरि प्रसीद हे यशस्करि
प्रसीद हे महेश्वरि प्रसीद हे भवेश्वरि ॥ ४

सुचन्दनाङ्ग-चर्चिते सुचारु-वस्त्र-मण्डिते
सुवर्ण-भूषणाङ्किते सुरत्न-हार-भूषिते ।
शिवे सुपुष्प-पूजिते सुगन्धि-धूप-नन्दिते
समस्त-देव-वन्दिते नमाम्यहं सुरार्चिते ॥ ५

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

त्वमम्ब शम्भु-कामिनी त्वमम्ब दम्भ-हारिणी
सुधाम्बु-कुम्भ-धारिणी दयाम्बुदाम्बु-वर्षिणी ।
अराति-सिन्धु-शोषिणी समस्तक्लेशनाशिनी
त्वमम्ब शक्तिदायिनी मयि प्रसीद तारिणी ॥ ६

उमां हिमालयात्मजां नमामि विश्वमातरं
शिवां च शक्तिदेवतां सदैव शत्रुनाशिनीम् ।
स्वधर्मरक्षणे शिवे प्रयच्छ नो सशक्ततां
स्वराष्ट्ररक्षणे भवानि देहि नो समर्थताम् ॥ ७

निशुम्भ-शुम्भ-राक्षसास्त्वया हता मदोद्धता
असंस्कृता बलोद्धता विनाशमेव यापिताः ।
त्वया भवानि शङ्करे सहस्रशश्च निर्जिता-
स्तवैव सेवया शिवे शिवेन शत्रवो जिताः ॥ ८

इमं स्तवं मनोहरं सदैव यः पठेन्नरः
प्रतिप्रभातमादरेण भक्तियुक्तचेतसा ।
शिवा सदा दयामयी भवत्यरातिनाशिनी
जयं यशः सुखं तथा तनोति तस्य शङ्करी ॥ ९

शक्तिदां भुक्तिदां शर्मदां मुक्तिदां
सर्वदामम्बिकां विश्वधात्रीं भजे ।
भक्तकामप्रदां विश्वनाथप्रियां
सर्वदानन्ददां मङ्गलां प्रार्थये ॥ १०

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

८. ॥ श्रीरामचन्द्रस्तवः ॥

(चामरम्)

सूर्यवंशसम्भवोऽपि चन्द्रकान्तिशीतलो
भूपतिस्तथापि निर्जितेन्द्रियो रघूत्तमः ।
नीलनीरदाभकान्तिमीश्वरं धनुर्धरं
राघवं नमाम्यहं सदैव साधुसेवितम् ॥ १

यज्ञरक्षणाय शैशवेऽपि राक्षसा हता
शम्भुचापभञ्जनेन जानकी त्वया वृता ।
विष्णुकार्मुके शरं नियुज्य भार्गवो जितस्-
त्वां नमन्ति भक्तितः सुराः सदैव हे विभो ॥ २

ताटका त्वया हता मदोद्धता महावने
दूषणादिदानवास्त्वया वने विनाशिताः ।
तप्त-काञ्चनाभ-कान्ति-भासुरो मृगो वने
प्रापितोऽन्तकान्तिकं शरेण राघव द्रुतम् ॥ ३

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

मेघनाद-कुम्भकर्ण-रावणादि-राक्षसा
विक्रमेण लीलया त्वया हता रणाङ्गणे ।
लोकरञ्जनाय जानकी विसर्जिता प्रिया
त्वां नमाम्यहं सदैव रामचन्द्र भूपते ॥ ४

एकबाणमेकवाक्यमेकभार्यकं विभो
त्वां स्तुवन्ति साधवो सदैव भक्तिचेतसा ।
धर्मरक्षणाय काननं त्वयाऽऽश्रितं प्रभो
त्वामनन्यभक्तितश्च पूजयन्ति मानवाः ॥ ५

वानरेन्द्र-वालि-नाशकाय राम ते नमः
सिन्धुगर्वनाशकाय रामचन्द्र ते नमः ।
वायुनन्दनादि-वानरैः सदैव सेवितं
लक्ष्मणाग्रजं च जानकी-पतिं नमाम्यहम् ॥ ६

त्यक्तयौवराज्यमार्जवेन युक्तमीश्वरं
व्याघ्रसर्पयुक्तकाननं गतं नृपेश्वरम् ।
राजरत्नमालिकासु सुप्रतिष्ठितं नृपं
सादरं सदैव नौमि भक्ति-युक्त-चेतसा ॥ ७

त्वत्समो न भूपतिर्भुवि प्रभो विराजते
त्वत्समो सुतोऽपि देव नान्यतो हि दृश्यते ।
प्रीतियुक्तमानसः पतिश्च नापरो जने
त्वामनन्यमानसो नमस्करोमि सन्ततम् ॥ ८

पापनाशिनीं तथैव सर्वकामदायिनीं
शक्ति-कीर्ति-मुक्तिदां स्मरेद् रघोः कथां सदा ।
रामचन्द्र-भूपतेः स्तवं सदैव यः पठेत्
तस्य तुष्टमानसो प्रभुर्दयामयो भवेत् ॥ ९

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

९. ॥ श्रीदत्तगुरुस्तवः ॥

(दोधकम्)

भक्तजनार्ति-विकर्तित-कीर्ति वेदचतुष्टयपूजितमूर्तिम् ।
दण्ड-कमण्डलु-मण्डित-पिण्डमं दत्तगुरुं प्रणमामि सदाऽहम् ॥ १

पाटल-वस्त्र-विभूषित-देहं भस्म-विभूषित-गौर-शरीरम् ।
भूतिकरं भव-भीति-कुठारं दत्तगुरुं प्रणमामि सदाऽहम् ॥ २

सज्जन-पोषण-रक्षण-दक्षं दुर्जन-शासन-भञ्जन-मग्नम् ।
सत्वर-दुस्तर-दुःखहरं तं दत्तगुरुं प्रणमामि सदाऽहम् ॥ ३

दुःखित-वन्दित-पाद-सरोजं पद्म-सुशोभित-दक्षिण-हस्तम् ।
योग-निधिं नव-नाथ-सनाथं दत्तगुरुं प्रणमामि सदाऽहम् ॥ ४

भीति-युतो भव-सिन्धु-निमग्न-स्त्वच्चरणं करवाणि शरण्यम् ।
अत्रिसुतं त्रिगुणादि-विहीनं दत्तगुरुं प्रणमामि सदाऽहम् ॥ ५

स्नास्यविमुक्तक-तीर्थ-जलौघे प्रार्थयसेऽन्नकणान् करवीरे ।
त्वन्महिमा न हि मानमवैति त्राहिगुरो प्रणमामि सदाऽहम् ॥ ६

दुःख-हुताशन-तप्तमधीरं दत्त दयार्णव दीनजनं माम् ।
तारय पाहि निरन्तर-तप्तं दत्तगुरो प्रणमामि सदाऽहम् ॥ ७

नाभिज–विष्णु–सदाशिव-मूर्ति दीन-जनावन-तत्पर-वृत्तिम् ।
विश्व-विषाद-विनाशन-दक्षं दत्तगुरुं प्रणमामि सदाऽहम् ॥ ८

अष्टकमत्रिसुतस्य सुगेयं दोधक-वृत्तमिदं रमणीयम् ।
श्रीगुरुनाम सदा नमनीयं भक्तजनैः सततं स्मरणीयम् ॥ ९

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

१०. ॥ श्रीलक्ष्मीस्तुतिः ॥

(पृथ्वी)

पयोधितनये रमेऽमृतसहोदरि त्वां भजे
दयामयि सदा दयां कुरु मयि त्वमेतावती ।
कराम्बुजनिवासिनी भव सदा ममोद्धारिणी
मदीयसदने सदा निवस पद्मनाभप्रिये ॥ १

सरोजवदनाम्बुजे सरसिजासनाधिष्ठिते
सरोरुहपदाम्बुजे सरसिजोरुपद्मासने ।
सरोजनयने सदा सरसिजप्रिये देवते
मदन्तरनिवासिनी भव सदा जगन्मोहिनी ॥ २

नमामि हरिवल्लभां सकलभाग्यदामिन्दिरां
भजामि भवतारिणीं सकलभक्तकामप्रदाम् ।
स्तवीमि मनसा तथा स्तवनगायनैस्त्वां सदा
भवामि नतमस्तकस्तव पुरो हिरण्यप्रदे ॥ ३

नमन्ति मुनिनां गणा नृपतयो महीपा अपि
स्तुवन्ति विबुधास्तथा मनुजराक्षसास्त्वां सदा ।
त्वयैव मधुसूदनो भवति देवि लक्ष्मीयुत-
स्त्वया विरहितः प्रभुर्भवति वामनो सिन्धुजे ॥ ४

त्वमेव कृपया धनं वितर देवि दीने जने
भवामि नतमस्तकस्तव पुरः सुरैः पूजिते ।
अशेषभयनाशिनी त्वमसि शेषशय्याङ्गने
नतोऽस्मि पदपङ्कजे तव च लक्ष्म्यतोऽहं सदा ॥ ५

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

सरोजवदने सदा तव कृपाकटाक्षं क्षिप
स्मिताननसरोरुहे मधुतरां गिरं देहि मे ।
ममाशिवविनाशिनी भव सदा सुचन्द्रानने
भवाब्धिसलिलाद् द्रुतं जननि तारयेमं जनम् ॥ ६

भ्रमामि भववालुकानिकरतप्तदेहः सदा
कृपासलिलवर्षिणी भव दयाम्बुकादम्बिनी ।
तवैव कृपया दयामयि मनः सदैवाऽस्तु मे
स्वधर्मपरिपालने, कुरु च मां समर्थं जने ॥ ७

हिरण्मयि सुवर्णदे कनकदेवते पाहि मां
प्रयच्छ सुधनं सदा विधनिने हिरण्यार्थिने ।
त्वदीयचरणाम्बुजे सरसिजे मम प्रार्थना
त्वया सह निरन्तरं वसतु मद्गृहे माधवः ॥ ८

लक्ष्मीस्तुतिमिमां रम्यां श्रद्धया यः पठेन्नरः ।
विनाश्य विपदं तस्य लक्ष्मीः सौभाग्यदा भवेत् ॥९॥

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

११. ॥ श्रीहनूमत्संस्तवः ॥

(भुजङ्गप्रयातम्)

नमाम्यञ्जनीनन्दनं वायुपुत्रं
नमामि प्रभुं वानराणां गणानाम् ।
सदा रामनामामृतं सेवमानं
नमामि प्रभुं मारुतिं रामदूतम् ॥ १

तडित्तेजसं वायुवेगं बलिष्ठं
चिरञ्जीविनं दिव्यवज्राङ्गदेहम् ।
दितेः सन्ततिं संहरन्तं कपीन्द्रं
वरेण्यं शरण्यं नितान्तं भजेऽहम् ॥ २

महासागरं लीलया लङ्घयित्वा
त्वयाऽऽश्वासिता भूमिकन्या सशोका
त्वया राक्षसेन्द्रस्य लङ्का विदग्धा
त्वयैतादृशी स्वामिसेवा विधत्ता ॥ ३

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

त्वदीयेन वेगेन तुल्यो न वायुर्
न वा मानसं मानवानां कपीश ।
सुमित्रासुतप्राणरक्षार्थमेव
गिरीन्द्राग्रमुत्पाट्य वेगेन नीतम् ॥ ४

वरिष्ठा वदान्याऽस्ति सेवा त्वदीया
प्रभू रामचन्द्रस्त्वयैव प्रसन्नः ।
त्वमेवासि चादर्शभूतो नराणां
भवत्पादपद्मं सदा वन्दनीयम् ॥ ५

त्वमेवाग्रणीर्धीवराणां नराणां
त्वमेवासि नेता बलोपासकानाम् ।
भुभुःकारनादेन रक्षः समूहास्
त्वया नाशिता वानरेन्द्रेण सर्वे ॥ ६

दशास्यस्य कीर्तिं विनाशं नयन्तं
सुदीनाञ्ज् जनांस्तारयन्तं कपीन्द्रम् ।
प्रभो रामचन्द्रस्य भक्तानवन्तं
हनूमन्तमेकं स्मरामि प्रभाते ॥ ७

अहंकारयुक्तश्च विद्यामदान्धः
सदा द्रव्यलुब्धोऽहमक्रोधहीनः ।
महामोहयुक्ते भवेऽस्मिन्निमग्नं
हनुमन् हताशं जनं पाहि नित्यम् ॥ ८

इमं संस्तवं रामदूतस्य रम्यं
पठेत् सादरं यो नरो भक्तियुक्तः ।
समस्तानि दुःखानि नीत्वा विनाशं
भवेत्तस्य वातात्मजः सौख्यदाता ॥ ९

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

१२. ॥ सप्तसप्तिसप्तकम् ॥

(चामर)

ध्वान्त-दन्ति-केसरी हिरण्य-कान्ति-भासुरः
कोटि-रश्मि-भूषितस्तमोहरोऽमितद्युतिः ।
वासरेश्वरो दिवाकरः प्रभाकरः खगो
भास्करः सदैव पातु मां विभावसू रविः ॥ १

यक्ष-सिद्ध-किन्नरादि-देवयोनि-सेवितं
तापसैर्ऋषीश्वरैश्च नित्यमेव वन्दितम् ।
तप्त-काञ्चनाभमर्कमादिदैवतं रविं
विश्व-चक्षुषं नमामि सादरं महाद्युतिम् ॥ २

भानुना वसुन्धरा पुरैव निर्मिता, तथा
भास्करेण तेजसा सदैव पालिता मही ।
भूर्विलीनतां प्रयाति काश्यपेयवर्चसा
तं रविं भजाम्यहं सदैव भक्तिचेतसा ॥ ३

अंशुमालिने तथा च सप्त-सप्तये नमो
बुद्धिदायकाय शक्तिदायकाय ते नमः ।
अक्षराय दिव्य-चक्षुषेऽमृताय ते नमः
शङ्ख-चक्र-भूषणाय विष्णु-रूपिणे नमः ॥ ४

भानवीय-भानुभिर्नभस्तलं प्रकाशते
भास्करस्य तेजसा निसर्ग एष वर्धते ।
भास्करस्य भा सदैव मोदमातनोत्यसौ
भास्करस्य दिव्य-दीप्तये सदा नमो नमः ॥ ५

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

अन्धकार-नाशकोऽसि रोगनाशकस्तथा
भो ममापि नाशयाशु देह-चित्त-दोषताम् ।
पाप-दुःख-दैन्यहारिणं नमामि भास्करं
शक्ति-धैर्य-बुद्धि-मोद-दायकाय ते नमः ॥ ६

भास्करं दयार्णवं मरीचिमन्तमीश्वरं
लोकरक्षणाय नित्यमुद्यतं तमोहरम् ।
चक्रवाक-युग्म-योग-कारिणं जगत्पतिं
पद्मिनीमुखारविन्द-कान्तिवर्धनं भजे ॥ ७

सप्तसप्ति-सप्तकं सदैव यः पठेन्नरो
भक्तियुक्तचेतसा हृदि स्मरन् दिवाकरम् ।
अज्ञता-तमो विनाश्य तस्य वासरेश्वरो
नीरुजं तथा च तं करोत्यसौ रविः सदा ॥ ८

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

१३. ॥ श्रीकृष्णचरितम् ॥

(अनुष्टुप्)

वसुदेव-देवकी-नन्द-यशोदानन्ददायकम् ।
वन्दे योगीश्वरं कृष्णं गीतापीयूषदायकम् ॥ १

कंस-कारागृहे जन्म यस्य बाल्यं च गोकुले ।
द्वारकायां कर्मयोगस्तं कृष्णं प्रणमाम्यहम् ॥ २

पूतना-धेनुकादीन् यः कंस-प्रेरित-राक्षसान् ।
जघान लीलया वन्दे तमहं यदु-नन्दनम् ॥ ३

गोकुलं बाललीलाभिस्तोषयन्तं सुरेश्वरम् ।
रक्षन्तं धेनुपान् धेनूर्नमाम्यच्युतमीश्वरम् ॥ ४

सान्दीपनिं गुरुं भक्त्या यस्तुतोष यदूत्तमः ।
शिष्योत्तमं तमादर्शं वन्देऽहं भक्तितः सदा ॥ ५

पार्थान् युधिष्ठिरादीन् यः सत्यधर्मपथे स्थितान् ।
आधारं दत्तवान् तस्मै दीनाधाराय ते नमः ॥ ६

मोहपङ्के निमग्नं तं विषीदन्तं रणेऽर्जुनम् ।
कर्तव्यं यो दिदेशस्तं यदुश्रेष्ठं नमाम्यहम् ॥ ७

सतां संरक्षणार्थाय दुष्टान् दण्डयितुं तथा ।
स्वर्गादवातरद् यो वै तस्मै कृष्णाय ते नमः ॥ ८

शिशुपाल-जरासन्ध-कंस-चाणूर-मुष्टिकान् ।
योऽहन् नमामि तं कृष्णं राजनीतिविशारदम् ॥ ९

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पाण्डवा रक्षिता येन समाश्वस्ता च द्रौपदी ।
निहताः कौरवास्तस्मै गोविन्दाय नमो नमः ।। १०

यो वेदोपनिषत्सारं गीताख्यं जगते ददौ ।
तस्मै पूर्णावताराय श्रीकृष्णाय नमो नमः ।। ११

शङ्ख-चक्र-गदा-पद्म-धारिणं श्यामसुन्दरम् ।
श्रीकृष्णं सगुणं द्रष्टुं काङ्क्षते मम मानसम् ।। १२

विश्वाधारं वासुदेवं सर्वव्यापिनमीश्वरम् ।
सच्चिदानन्दमूर्ति त्वां वन्देऽहं सादरं प्रभो ।। १३

श्रीकृष्णचरितं दिव्यं श्रुत्वाऽऽचरति यस्तथा ।
सफलं जन्म तस्यास्ति निश्चिताऽत्र मतिर्मम ।। १४

।। ॐ ।।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

१४. ॥ श्रीमन्दाकिनीस्तोत्रम् ॥

(रागः मारवा)

जयतु जयतु मन्दाकिनि तव सलिलं धवलम् ।
नय विलयं भागीरथि मम दुरितं निखिलम् ॥

शं तनु शन्तनुदयिते
सदया भव भवपतिते
शमय विषयमलमलिनं मे जननि मानसम् ॥ १

सुर-तटिनी सुर-सुखदा
वसुजननी त्वं वसुधा
अघनाशिनि सुखदा त्वं भवसि जननि सततम् ॥ २

मीना ये तव सलिले
तरवस्तव ये पुलिने
अमरा अपि काङ्क्षन्ते तद्भाग्यं विपुलम् ॥ ३

सुर-सेव्यं तव तीरम्
मधु-मधुरं तव नीरम्
भवतु सदा गङ्गे तव चरणं मम शरणम् ॥ ४

हरिचरणान्निर्याता
हरशीर्षे विश्रान्ता
अपनय मम मानस-मलमधुना त्वं प्रबलम् ॥ ५

हिम-शिशिरं विधु-धवलम्
पावनतरमतिरुचिरम्
विलसतु मम वदने तव गङ्गे जलमनिशम् ॥ ६

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

तव चरणे लीनोऽहम्
स्मरणे तव मग्नोऽहम्
शरणागतदीनं मां जननि पाहि तनयम् ॥ ७

भालचन्द्र-शीर्षस्था
तनुषे त्वं मङ्गलताम्
नवसुषमां मन्दाकिनि वहसि त्वं रम्याम् ॥ ८

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

१५. ॥ श्री शारदा-स्तवनम् ॥

(राग: केदार)

देवि शारदे निर्मल-मतिदे शरणं तव पदकमलम् ।
प्रसन्नवदने सुधांशुवसने नाशय मम मति-तिमिरम् ॥ १

विश्ववन्दिते गानरञ्जिते तनु मे मनसि निवासम् ।
सत्वरमुद्धर मां भवसागरपतितं हा विलपन्तम् ॥ २

बहुसुखदायिनि दुरितविनाशिनि संहर तापत्रितयम् ।
सुवर्णरचिते नवरसमुदिते करुणां कुरु विनतोऽहम् ॥ ३

वीणाधारिणि मयूरवाहिनि हृदये वस मे सततम् ।
ज्ञानकरीमज्ञानसंहरीं वन्देऽहं त्वामनिशम् ॥ ४

वादयसि त्वं वीणां सततं नयसि लयं च विषादम् ।
ज्ञानविहीनं व्यर्थं सकलं कथयसि तत्त्वं विमलम् ॥ ५

स्वयम्भु-तनये दयार्द्रहृदये व्यपनय मानस-तापम् ।
प्रतिभाशालिनि सरोजवासिनि कुरु मे प्रतिभावन्तम् ॥ ६

प्रणत-भक्तजन-दुःख-विनाशनमेतत् त्वदीयकार्यम् ।
अध्ययने ये निरताः सदये वितरसि तेषु ज्ञानम् ॥ ७

तनयमधीरं जननि सत्वरं पायय दिव्य-स्तन्यम् ।
घनान्धतिमिरे सुघोरविपिने धीरय मार्गभ्रष्टम् ॥ ८

तव पदकमले विलसतु विमले मदीय-जीवनपद्मम् ।
नान्यकामनां नान्ययाचनां काङ्क्षति भगवति चित्तम् ॥ ९

॥ ॐ ॥

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ भाषासु मधुरा दिव्या पवित्रा सुरभारती ॥

शर्करा

गृहोपयोगाय ...

निर्यातकरणाय

भारत-राष्ट्रे शर्करानिर्मातृषु
प्रति-एकर-क्षेत्रम् इक्षु-निर्माणे
शर्करानिर्माणे च अग्रतःसराणाम्
अस्माकम् राष्ट्रोत्कर्षे राष्ट्रविभवे
श्रे यो भा गि ता
अ भि मा ना स्प द म् ।

गोदावरी-शर्करा-कर्मान्तः मर्यादितः

(दि गोदावरी शुगर मिल्स लि.)

कार्यदर्शी प्रतिनिधिः—

के. जे. सोमैया अॅण्ड सन्स प्रायव्हेट लिमिटेड

फाजलभॉय बिल्डिङ्ग फोर्ट, महात्मा गान्धी-मार्गः, मुम्बई १

★ संस्कृताभ्यासार्थम् अवश्यं संग्राह्या ★

पं. वामन वेङ्कटेश आपटे——विरचिता

पा ठ्य व्या क र ण दी पि का

पृष्ठसंख्या १५०   मूल्यम् रु. १–२५

पत्रव्यवहारस्थानम् 'शारदा'–कार्यालयः पुण्यपत्तनम् ३०

शृङ्गेरी'श्री'चरण-कृपा-प्रसादेन मङ्गलीभूतम्
पुण्यपत्तने पुण्यं निवासस्थलम्

॥ हॉटेल स्वस्ति ॥

१२३४, आपटे-मार्गः(दूरवाणी ५५५००)पुण्यपत्तनम् ४

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

पुण्यपत्तन-नगर-छाटण-कार्यालयाय २५-९-७० दिने समर्पितम्
शारदा-(पुण्यपत्तनम् ३०.) ११ : २१-२२ ★ रजि. क्र. एम्. एच्. ५५७

शारदा-गौरव-ग्रन्थमाला

पुष्पम्	लेखकः	मूल्यम्
१. श्रीराजेन्द्रप्रसादचरितम्	पं. वासुदेवशास्त्री लाटकर	३.००
२. वात्सल्यरसायनम्	प्रा. श्री. भा. वर्णेकर	१.००
३. शिक्षैषा सात्त्विकी सताम्	प्रा. रं. रा. देशपाण्डे	२.०५
४. श्रीरामकृष्णपरमहंसीयम्	प्रा. श्री. भा. वर्णेकर	१.२०
५. बालकानां जवाहरः	पं. विघ्नहरि देव	०.४०
६. श्रीमान् विन्स्टनः चर्चिलः	पं. औदुम्बरकर शास्त्री	०.६४
७. अप्पाशास्त्रीः साहित्यसमीक्षा	प्रा. अशोक अकलूजकर	२.००
८. श्रीशिवराज्योदयम्	डॉ. श्री. भा. वर्णेकर	८.००
९. 'समानमस्तु वो मनः'	डॉ. ग. बा. पळसुले	३.००
१०. मराठी-संस्कृत-शब्दकोषः	जोशी-परांजपे-गाडगीळ	२५.००
११. भूपो भिषक्त्वं गतः।	पं. ग. पां. लोण्ढेशास्त्री	१.००
१२. विनायक-वीर-गाथा	डॉ. ग. बा. पळसुले	३.००
१३. आङ्ग्ललघुकाव्यानुवादमाला	पं. ल. ज. खरे	२.००
१४. श्रीराजयोगभाष्यम्	डॉ. चिं. त्र्यं. केङ्घे	५.००
१५. मुक्तक-मञ्जूषा	दि. दा. बहुलीकर	२.००
१६. ललित-गीता-लहरी	पं. ओगेटि परिक्षित् शर्मा	१.५०
१७. जैत्र-यात्रा-विलाससारः	श्रीभाष्यस्वामी	१.००
१८. वैशम्पायनजीवनगाथा	पं. का. र. वैशम्पायन	८.००
१९. संस्कृतस्य प्रगतिपथे कः तिष्ठति?	पं. ल. म. चक्रदेव	२.००
२०. शाङ्करदिग्विजयः	श्रीविद्यारण्यः	८.००
२१. शिष्यलेखः (चन्द्रगोमिपादः)	डॉ. प. ल. वैद्य	५.००
२२. महात्म-चरितम्	पं. पं. ना. पाठक	२.००
२३. स्तोत्र-पञ्चदशी	पं. म. स. आपटीकर	१.००

प्राप्तिस्थानम् – 'शारदा'–कार्यालयः, पुण्यपत्तनम् ३०

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगीळ
मुद्रणस्थलम् – यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् ३०.
प्रकाशनस्थलम्-१. म.म.प्रा.द.वा.पोतदार,४९८ शनिवार, पुण्यपत्तनम् ३०.
२.–श्री.ल.म.चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४.
कार्यालयः–खजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् ३०.

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri